चौरेण हन्यते लोकः परचक्रसमागमः ।
संग्रामश्च महाघोरो दुर्भिक्षं मरकं तथा ॥
अद्भुतानि प्रसूयन्ते तत्र देशस्य विद्रवः ।
अकाले फलपुष्पाणि देशविद्रवकारणं" ॥ * ॥
मत्स्यपुराणे ।
"अतिवृष्टिरनावृष्टिर्दुर्भिक्षादिभयं मतं ।
अन्ततौ तु दिनादूर्द्धं वृष्टिर्ज्ञेया भयाय च ॥
निरभ्रे वाथ रात्रौ वा श्वेतं याम्योत्तरेण तु ।
इन्द्रायुधं ततो दृष्ट्वा उल्कापातं तथैव च ॥
दिग्दाहपरिवेशौ च गन्धर्व्वनगरं तथा ।
परचक्रभयं विद्यात् देशोपद्रवमेव च" ॥
भासो वनकुक्कुटः ॥ * ॥ कंसनिधनसूचने हरिवंशः,—
"वक्रमङ्गारकश्चक्रे चित्रायां घोरदर्शनः ।
चलत्यपर्व्वणि मही गि ‹री›णां शिखराणि च" ॥ * ॥
बाणोत्पाते स एव ।
"दक्षिणां दिशमास्थाय धूमकेतुः स्थितो भवेत् ।
वक्रमङ्गारकश्चक्रे कृत्तिकासु भयङ्करः" ॥ * ॥
कृत्यचिन्तामणौ ।
"त्यक्ताशौचविवेकतत्त्ववसुधा लोकाः क्षुधापीड़िताः ।
विप्रा वेदहतास्तथा प्रचलिता बक्राश्रिनो दुःखिताः ।
क्षौणी मन्दफला नृपाश्च विकलाः संग्रामघोरा मही
प्रेताघातदुरन्तपीड़िततरा देवेज्यराज्ञोर्द्धितौ ॥
रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः ।
धान्यहिरण्यत्वकफलकुसुमाद्ये वर्षिते भयं विद्यात् ॥
अङ्गारपांसुवर्षे विनाशमुपयाति तन्नगरं ।
उपलं विना जलधरैर्विकृता वा यदा प्राणिनो वृष्ट्या ॥
छिद्रं वाप्यतिवृष्टिं शस्यानामीतिसंजननं" ॥ * ॥
बुधकौशिकसम्वादे ।
"पल्लगाः प्रपाते च फलं शरटस्य परोहणे ।
शीर्षे राजश्रियोऽव्याप्तिर्भाले चैश्वर्य्यमेव च ।
कर्णयोर्भूषणावाप्तिर्नेत्रयोर्बन्धुदर्शनं ॥
नासिकायाञ्च सौगन्ध्यं वक्त्रे मिष्टान्नभोजनं ।
कण्ठे चैव श्रियोऽवाप्तिर्भुजयोर्विभवो भवेत् ॥
धनलाभो बाहुमूले करयोर्धनवृद्धयः ।
स्तनमूले च सौभाग्यं हृदि सौख्यविवर्द्धनं ॥
पृष्ठे नित्यं महीलाभः पार्श्वयोर्बन्धुदर्शनं ।
कटिद्वये वस्त्रलाभो गुह्ये मृत्युसमागमः ॥
जङ्घे चार्थक्षयो नित्यं गुदे रोगभयं भवेत् ।
उर्व्वोस्तु वाहनावाप्तिर्जानुजङ्घेऽर्थसंक्षयः ॥
वामदक्षिणयोः पादोर्भ्रमणं नियतं भवेत् ।
पल्लगाः परोहणे चैव पतने शरटस्य च ॥
व्यत्यासाच्च फलञ्चैव तद्वदेवं प्रजायते ।
पल्लगाः परोहणं रात्रौ शरटस्य प्रपातनं ॥
निधनार्थाय भवति व्याधिपीड़ाविपर्य्यये ।
पतनानन्तरञ्चैवारोहणं यदि जायते ॥
पतने फलमुत्कृष्टं रोहणेऽन्यत् फलं भवेत् ।
आरोहणञ्चोर्द्धवक्त्रे अधोवक्त्रे च पातनं ॥
भवेदिष्टफलं तस्य तत्फलं जायते ध्रुवं ।
स्पृष्टमात्रेण यः सद्यः सचेलं जलमाविशेत् ॥
पञ्चगव्यप्राशनञ्च कुर्य्यादर्कावलोकनं ।
पल्लीरूपं सुवर्णस्य रक्तवस्त्रेण वेष्टयेत् ॥
पूजयेद्गन्धपुष्पाद्यैस्तदग्रे पूर्णकुम्भके ।
पञ्चगव्यं पञ्चरत्नं पञ्चामृतं सपल्लवं ॥
पञ्चवृक्षकषायञ्च निःक्षिप्यावाहयेत् ततः ।
पूजयेद्गन्धपुष्पाद्यैर्लोकपालांस्तथा ग्रहान् ॥
मृत्युञ्जयेन मन्त्रेण समिद्भिः खादिरैः शुभैः ।
तिलैर्व्वाहुतिभिर्होममष्टोत्तरसहस्रकं" ॥
पल्ली गृहगोधिका । मृत्युञ्जयमन्त्रस्त्र्याम्बकमन्त्रः ।
इति त्रिद्याकरः ॥ * ॥ गर्गसंहितावार्हस्पत्ययोः ।
"ये तेषु शान्तिं कुर्व्वन्ति न ते यान्ति पराभवं ।
ये तु न प्रतिकुर्व्वन्ति क्रियया श्रद्धयान्विताः ॥
दाम्भिक्याद्वा विमोहाद्वा विनश्यन्त्येव तेऽचिरात्' ॥ * ॥
अत्र निमित्तनिश्चयवतोऽधिकारः । अन्यथा
दोषः । इत्याह मत्स्यपुराणं,—
"भिन्नमण्डलवेलायां ये भवन्त्यद्भुताः क्वचित् ।
तत्र शान्तिद्वयं कार्य्यं निमित्ते सति नान्यथा ।
निर्निमित्तकृता शान्तिर्निमित्तमुपपादयेत् ।
एतच्च तत्तद्विशेषविहितशान्तिविषयं । अन्यथा
वेलामण्डलसन्देहे शान्तिर्न स्यात् साधारण-
शान्तिश्च निर्विषया स्यात् । अतएवोक्तं योगि-
याज्ञवल्क्येन,—
"यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः ।
तत्र तत्र तिलैर्होमो गायत्र्या समुदाहृतः ॥
गायत्र्या प्रयतः शुद्धः सर्व्वपापैः प्रमुच्यते ।
शान्तिकामश्च जुहुयात् गायत्रीमक्षतैः शुचिः ॥
हन्तुकामश्च नृपतेर्घृतेन जुहुयात् शुचिः ।
सावित्र्या शान्तिहोमांश्च कुर्य्यात् पर्व्वसु नित्यशः ॥
प्रणवव्याहृतिभ्याञ्च स्वाहान्ता होमकर्म्मणि ।
प्रतिलोमा प्रयोक्तव्या फट्कारान्ताभिचारके ॥ * ॥
विश्वामित्रेणापि निमित्तसन्देहे कृच्छ्रादीन्युक्तानि ।
यथा,—
"कृच्छ्रचान्द्रायणादीनि शुद्ध्यभ्युदयकारणं ।
प्रकाशे च रहस्ये च संशयेऽनुक्तकेऽस्फुटे ॥ * ॥
मार्कण्डेयपुराणं ।
"दिग्देशजनसामान्यं नृपसामान्यमात्मनि ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभं ॥
परस्पराभिवादश्च ग्रहदोषेषु जायते" ॥
तथा,—
"तस्माच्छान्तिपरः प्राज्ञो लोकवादरतस्तथा ॥
लोकवादांश्च शान्तीश्च ग्रहपीड़ासु कारयेत् ।
भूदोहानुपवासांश्च शस्तं चैत्याभिवन्दनं ॥
कुर्य्यात् होमं तथा दानं श्राद्धं क्रोधविवर्जनं ।
अद्रोहं सर्व्वभूतेषु मैत्रीं कुर्य्याच्च पण्डितः ॥
वर्जयेदुषतीं वाचमतिवादांस्तथैव च ।
ग्रहपूजाञ्च कुर्व्वीत सर्व्वपीड़ासु मानवः ॥
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रयतानां मनुष्याणां ग्रहर्क्षोत्थान्यनेकशः" ॥ * ॥
लोकवादाश्च तत्रैवोक्ताः । यथा,—
"आकाशाद्देवतानाञ्च दैत्यादीनाञ्च सौहृदात् ।
पृथिव्यां प्रतिलोके च लोकवादा इति स्मृताः ॥"
ते च सर्व्वभूतडाकिन्याद्यभिभवशान्त्यर्थं लौकि-
कौषधमन्त्रादयः विषहरीमङ्गलचण्डिकागीतादयः
चैत्यवृक्षादौ क्षेत्रपालदेवतापूजा च । तथा-
चापस्तम्बः । स्त्रीभ्योऽवरवर्णेभ्यो धर्म्मशेषान्
प्रतीयादित्येक इति । धर्म्मशेषान् श्रुतिस्मृति-
सदाचारेष्वप्रसिद्धानिति नारायणोपाध्यायाः ।
भूदोहश्च पात्रं विना भूमौ गोस्तनं निष्पीड्य
दुग्धोत्सर्गः । चैत्यः पूज्यत्वेन ख्यातो ग्रामस्य
वृक्षः । तथा च बाणोत्पाते हरिवंशः,—
"अनेकशाखश्चैत्यश्च निपपात महीतले ।
अर्च्चितः सर्व्वकन्याभिर्दानवानां महात्मनां ॥"
उषतीमकल्याणीं । अतिवादश्च पूज्यमतिक्रम्य
भाषणं ॥ * ॥ मत्स्यपुराणं,—
"काकस्यैकरवश्रावः प्रभाते दुःखदायकः ।
काको मैथुनकासक्तः श्वेतो वा यदि दृश्यते ॥
उलूको वसते यत्र निपतेद्वा तथा गृहे ।
क्षेयो गृहपतेर्मृत्युर्धननाशस्तथैव च ॥ * ॥"
वराहसंहितायां,—
क्रीड़ानुरक्तो रतिमांसलुब्धो
भीतो रुजार्त्तः पतितो विहङ्गः ।
नासौ गृहस्थस्य विनाशहेतु-
र्दोषः समुत्पद्यत आहुरार्य्याः ॥ * ॥
अद्भुतशान्तिमाह मात्स्ये,—
"गृहे पक्षिविकारेषु कुर्य्याच्चामरतर्पणं ।
देवाः कपोता इति वा जप्तव्यं सप्तभिर्द्विजैः ॥
गावश्च देया विविधा द्विजानां
सकाञ्चना वस्त्रयुगोत्तरीयाः ।
एवं कृते पापमुपैति शान्तिं
मृगैर्द्विजैर्व्वा विनिवेदितं यत् ॥"
द्विजैः पक्षिभिः । अपिवा अन्यैरपि ॥ * ॥ भुज-
बलभीमे ।
"एको वृषस्त्रयो गावः समाश्वा नव दन्तिनः ।
सिंहप्रसूतिका गावः कथिताः स्वामिघातकाः ॥ * ॥"
मत्स्यपुराणे ।
"अङ्गे दक्षिणभागे तु शस्तं विष्फुरणं भवेत् ।
अप्रशस्तं तथा वामे पृष्ठस्य हृदयस्य च ॥
लाञ्छनं पिटकं चैव ज्ञेयं विष्फूर्जितं तथा ।
विपर्य्ययेण विहितं सर्व्वं स्त्रीणां फलं तथा" ॥ * ॥
अनिष्टचिह्नोपगमे द्विजानां कार्य्यं सुवर्णेन च
तर्पणं स्यात् । शङ्खः । "दुःस्वप्नानिष्टदर्शनादौ घृतं
हिरण्यञ्च दद्यात्" इति । मात्स्ये ।
"नमस्ते सर्व्वलोकेश नमस्ते भृगुनन्दन ।
कवे सर्व्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥
एवं शुक्रोदये कुर्व्वन् यात्रादिषु च भारत ।
सर्व्वान् कामानवाप्नोति विष्णुलोके महीयते ॥
नमस्तेऽङ्गिरसां नाथ वाक्पतेऽथ वृहस्पते ।
क्रूरग्रहैः पीड़ितानाममृताय नमो नमः ॥
संक्रान्तावपि कौन्तेय यात्रास्वभ्युदयेषु च ॥
कुर्व्वन् वृहस्पतेः पूजां सर्व्वान् कामान् समश्नुते" ॥
वैष्णवामृते व्यासः ।
"ग्रहयज्ञैः शान्तिकैश्च किं क्लिश्यन्ति नरा द्विज ।
महाशान्तिकरः श्रीमांस्तुलस्या पूजितो हरिः ॥
उत्पातान् दारुणान् पुंसां दुर्निमित्ताननेकशः ।
तुलस्या पूजितो भक्त्या महाशान्तिकरो हरिः ॥"
अत्र ब्रह्मपुराणीयो मन्त्रः ।
"नमस्ते बहुरूपाय विष्णवे परमात्मने स्वाहा"